International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(1): 34-37
© 2018 IJSR
www.anantaajournal.com
Received: 27-11-2017
Accepted: 29-12-2017

**डा. नृसिंहनाथगुरु**
सहायकाचार्यः, साहित्यविभागः
कलियाचक-विक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः
हेरिया, पूर्वमेदनीपुरम्, पश्चिमबङ्ग,
भारत

**Correspondence**
**डा. नृसिंहनाथगुरु**
सहायकाचार्यः, साहित्यविभागः
कलियाचक-विक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः
हेरिया, पूर्वमेदनीपुरम्, पश्चिमबङ्ग,
भारत

# श्रीगौरकृष्णोदयकाव्यसमीक्षा

**डा. नृसिंहनाथगुरु**

**प्रस्तावना**

देवभूमिरूपत्वेन प्रसिद्धमस्माकं भारतवर्षम्। अत्रैव काले काले अनेके महापुरुषाः दिव्यात्मनः आविर्भूय प्रकाशयन्ति ज्ञानालोकेन सम्पूर्णं जगदिदं प्रेमप्रवाहेण प्लावयन्ति च। कदाचित् स्वयं भगवानपि दुष्टाचारविनाशाय शिष्टाचाररक्षणाय च विविधं स्वरूपमङ्गीकुर्वन् स्ववतारेण जगदुद्धरति। एतेष्वेव दिव्यप्रकाशेषु अन्यतमः श्रीगौराङ्गदेवः श्रीगौरकृष्णः श्रीचैतन्यदेवः श्रीकृष्णचैतन्यमहाप्रभुर्वा; पञ्चदशशताब्द्यां बङ्गप्रदेशे नवद्वीपे अवतीर्य सम्पूर्णं जगदेव नामसंकीर्तनरसेन निमज्जयामास। यथोक्तम् –

"स्त्रीपुत्रादिकथां जहुर्विषयिणः शास्त्रप्रवादं बुधा।
योगीन्द्रा विजहुर्मरून्नियमजक्लेशं तपस्तापसाः॥
ज्ञानाभ्यासविधिं जहुश्च यतयश्चैतन्यचन्द्रे परा।
माविष्कुर्वति भक्तियोगपदवीं नैवान्य आसीद्रसः॥ "[i]

एतस्य गौराङ्गदेवस्य जीवनचरित्रमाश्रित्य यथा बङ्गभाषायां सन्ति अनेके ग्रन्थास्तथैव संस्कृतेऽपि तद्विषयकं साहित्यं प्रचुरतरमुपलभ्यते। तत्र कविकर्णपूरस्य श्रीचैतन्यचन्द्रोदयनाटकम्, श्रीकृष्णचैतन्यचरितामामृतमहाकाव्यं च सुप्रसिद्धमेव। अयं गोविन्दकविः उत्कलप्रदेशे श्रीबक्रेश्वरपण्डितस्य परिवारे जन्म लब्धवान्। असौ अष्टादशसर्गविशिष्टं सालाङ्कारं विविधच्छन्दोभिरलङ्कृतं श्रीगौरकृष्णोदयः इति नामधेयं महाकाव्यं बङ्गलिप्यां १६८० तमे शकाब्दे आश्विनकृष्णद्वितीयातिथौ विरचितवान्। यत्र भगवतः गौराङ्गमहाप्रभोः लीलाविलासः वर्णितः दृश्यते। यथा –

"श्रीगौराङ्गयतीन्द्रपुङ्गवपदद्वन्दारविन्दोदर।
प्रोन्मीलन्मकरन्दविन्दुनिकारस्वादप्रमत्तालिना॥
गौविन्देन कृते कृतिप्रियकृते श्रीगौरकृष्णोदये।
सर्गोऽयं निरगात् कलावतरणो नामादिमः शन्तमः॥ "[ii]

महाकाव्यमिदं देवनागरीलिप्यामद्यावधि न प्रकाशितम्, वङ्गलिप्यामेकमेव मूलमात्रं प्रकाशनं सम्प्रत्युपलभ्यते। यस्य प्रकाशकः विमलाप्रसादसिद्धान्तसरसस्वती विद्यते।[iii]

अस्मिन् महाकाव्ये अष्टादशसर्गेषु प्रथमसर्गे भगवतः श्रीगौरकृष्णस्य कलावतरणम्, द्वितीयसर्गे प्रभावविषयः, तृतीयसर्गे बालनिर्णयः, चतुर्थसर्गे वैवाहिकः उत्सवः, पञ्चमसर्गे योवनमयकालः, षष्ठसर्गे सन्यासलीला, सप्तमसर्गे लीलाद्रियात्रा, अष्टमसर्गे उत्कलकुलप्रेमप्रदानम्, नवमसर्गे दक्षिणयात्रा, दशमसर्गे दक्षिणयात्रानिवृत्तिः, एकादशसर्गे नागपतिप्रसादः सुभगः, द्वादशसर्गे सर्वर्तुयात्रा, त्रयोदशसर्गे अङ्गवङ्गगौडागमः, चतुर्दशसर्गे वृन्दावनावलोकनम्, पञ्चदशसर्गे आश्रयसमाख्यानम्, षोडशसर्गे भक्तप्रमोदोदयः, सप्तदशसर्गे अद्भूतदशाविर्भावः, अष्टादशसर्गे स्वधर्मविजयविषयाः वर्णिताः सन्ति।

अस्मिन् काव्ये शब्दालङ्काराणामनुप्रासादीनामर्थालङ्कारादीनामुपमादीनाम्, गुणानां प्रसादादीनां रीतिनां वैदर्भ्यादीनां, रसध्वनिनां च समावेशः दर्शनीयो वर्तते।

अस्मिन् महाकाव्ये पदे पदे अनुप्रासादीनां शब्दालङ्काराणां वैभवमपि निरीक्षणीयं यथा –

"सुप्तं तुङ्गभुजङ्गपुङ्गवमहातल्पेऽनु कल्पान्तरं
गुप्ते रङ्गमहामहीधरदरीदुर्गोदरे निर्वृतम्॥
तं दृष्ट्वा कमलाचलाश्रितपदं प्रेमास्पदं चक्षुषां
चैतन्यश्चलचेतनश्चकितदृक् नित्यं चिरं तस्थिवान्॥ "[iv]

**उपामायाः चमत्कारो द्रष्टव्यो यथा**

"यद्यप्यमीभिश्चरितामृतञ्च चैतन्यचन्द्रस्य निपीतमग्रे।
तथापि तत्रास्ति ममावकाशः पीते चकोरस्य सुरैरिवेन्दौ॥ "[v]

**किञ्च नवमसर्गे प्रेमवर्णने गोपिनां स्वरूपं यथा –**

"प्रेमेत्युशन्त्यखिलसारतरांशमस्याः प्रेम्णोऽपि सारतरमेव महादिभावम्।
सा राधिकावदधिका ननु तत् स्वरूपा या शृङ्खला हि खलु कृष्णमतङ्गजस्य॥ "[vi]

**अनुप्रासोपममयोः यथा –**

"ततः परं मिश्रपुरन्दरप्रिया शुचिस्वभावेन शची शचीसमा।
प्रपद्य तद्दोहदलक्ष्म शिश्रिये श्रियं घनाच्छन्नविधोः शरद्दिवः॥ "[vii]

**रूपकस्य वर्णनं यथा –**

"ज्येष्ठस्त्वमग्रे मम विश्वरूपो भूयाः परिव्राजकचक्रवर्ती।
श्रीकृष्णचैतन्यसमाख्ययाहं भूयासमायासमहो यतीन्द्रः॥ "[viii]

**माधुर्य्यगुणस्य परिप्रकाशः यथा –**

"विलोक्य तं लोकसूतैकसुन्दरं स्वदृक् कुरङ्गीकुलकेलिमन्दिरम्।
शशंसूराशीर्वचनैरनेकशः कथञ्चिदीयुर्निजधाम ताः पुनः॥ "[ix]

**प्रसादगुणस्य यथा –**

"कीर्त्तिमेति तनये सुशासिते शासिते जगति गर्हते पिता।
धर्म एष पितुरुत्तमस्ततः कथ्यते किमनिदं विदा त्वया॥ "[x]

यथा महाकविः गुणानां वर्णने सिद्धहस्तः तथैव वैदर्भ्यादि – रीतीनां वर्णनेऽपि प्रसिद्धिं गतः। तत्र वैदर्भी रीतिः यथा –

"पुनश्च गौरः किल गौररुक्तया तथैव कृष्णोऽखिलचित्तकर्षणात्।
तयोरिहैकाधिकरण्यतोऽन्वयात् स गौरकृष्णोऽयमिति प्रतीयताम्॥ "[xi]

वैदर्भीगौडीयोः उभयोः एकमुदाहरणम् -
"श्रीगौराङ्गयतीन्द्रपुङ्गवपदद्वन्दारविन्दोदर
प्रेन्मीलन्मकरन्दबिन्दुनिकरास्वादप्रमत्तालिना।
गोविन्देन कृते कृतिप्रियकृते श्रीगौरकृष्णदये
सर्गोऽसौ भगवत् प्रभावविषयो नाम द्वितीयोऽगमत्॥ "[xii]

**अस्मिन् महाकाव्ये नवरसानां समन्वयो दृश्यते। शृङ्गाररसस्य वर्णनं यथा –**

"असंख्यलक्ष्मीस्पृहणीयलक्ष्मी लेशाऽपि केशाद्यसुरारिराधा।
राधा समासाद्य यमद्य सद्यो माद्यत्यलं स्विद्यति चावशाङ्गी॥ "[xiii]

**करुणरसस्याविर्भावः यथा –**

"तदविमृष्य करमृष्टलोचने मातरं मृदुपदाघ्नति प्रभौ।
हा हतेयमिति तत्र कौतुकात् तां प्रगृह्य वनिता विचुक्रुशुः॥ "[xiv]

**वीभत्सरसस्योदाहरणं यथा –**

"शरीरमेतन्मलमूत्रमन्दिरं मृतोपमं नित्यममेध्य मेधते।
मदीक्षया मन्मनुदीक्षया विना न मेध्यतामेति मथैन मज्जनैः॥ [xv]

**भावध्वनिः यथा –**

"द्विदन्नसौ यन्नवनौ शनैः शनैः स्वजानुयुग्मेन करद्वयेन च।
क्वचिन्निजौ तौ जनकौ शुभे दिने सदुग्धमृद्वन्नमदन्नमोदयत्॥ "[xvi]

**वात्सल्यरसस्य वर्णनं यथा –**

"अमात्रमात्रादिपदार्द्धभाषिणा प्रहर्षहासस्फुटदन्तकान्तिना।
इतस्ततः प्रस्खलदङ्घ्रिरङ्गिणा ननन्दतुस्तेन सुतेन दम्पती॥ "[xvii]

**महाकवेः न्याय – वेदान्त – व्याकरणादि शास्त्रेषु प्रवेशः आसीदीति काव्यस्यास्यालोचनेन ज्ञायते। न्यायशास्त्रे प्रवेशः यथा–**

"एकेन केऽप्यच्युत केप्युभाभ्यां त्रिभिश्चतुर्भिस्तव पञ्चभिश्च।
षड्भिस्तथाष्टाभिरपि प्रमाणैः प्रमाणयन्तो न विदुः स्वरूपम्॥ "[xviii]

**वेदान्तशास्त्रे प्रवेशः यथा –**

"शिवः शिलायास्य भवस्य चाभूदद्वैत आचार्य इति प्रसिद्धः।
बलोऽपि गौडे क्वचिदेत्य नित्यानन्दत्वमानन्दमयोऽवधूतः॥ "[xix]

**पातञ्जलयोगशास्त्रे प्रवेशः यथा –**

"क्लेशैर्विपाकाशरकर्मभिश्च योऽमिश्रितो यदवदनेषु वेदान्।
प्रविश्य लोकाननुगृह्य चास्ते स कस्य वा विश्ववशीवशोऽस्तु॥ "[xx]

तदेवं विविधकाव्यतत्त्वपरिपूरितं महाकाव्यमिदं संस्कृतसाहित्यभाण्डागारस्य श्रीसमृद्धिसाधनाय अलम्।

## सहायकग्रन्थसूची


1. संस्कृतसाहित्येतिहासः – आचार्यलोकमणिदाहालः, चौखम्बाकृष्णदास अकादमी, वाराणसी।
2. संस्कृत साहित्य का अभिनव इतिहास – डा. राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन वाराणसी।
3. संस्कृत साहित्य का इतिहास – आचार्य वलदेव उपाध्याय, शारदा निकेतन वाराणसी, २२१०१०।
4. बङ्गीय साहित्येर इतिहास – सुकुमार सेन, साहित्य अकादमी, दिल्ली।
5. गौराङ्गविजयः – सुकुमारसेनः, एन्.एम्.कलिकाता – १९५७।
6. चैतन्यचन्द्रिका – अरूपानन्ददासगोस्वामी, अनन्त कल्कि राष्ट्रियसेवापरिषदः, १९९२।
7. भगवान् चैतन्यदेवः – श्रीपद श्रीनिकेतनदासः, गौडीयाश्रमः, खोर्द्धा, पुरी।
8. महाप्रभु गौराङ्ग सुन्दर –सुधा सेन, सुकुमारकुन्त, कोलकाता – १३७२।
9. श्रीचैतन्यभागवत – वृन्दावनदास ठाकुर, साहित्य अकादमी, दिल्ली।
10. श्रीचैतन्यचन्द्रामृतम् – प्रबोधानन्द सरस्वती, हरिदास शास्त्री, उत्तरप्रदेशः।
11. श्रीगौराङ्गचन्द्रोदयः – हरिदासशास्त्री, १९८२।
12. श्रीचैतन्यचरितामृतम् – मुरारीगुप्त, मृणालकान्ति घोषः।
13. श्रीकृष्णचैतन्यचरितामृतमहाकाव्यम् – कविकर्णपुरः, हरिदासशास्त्री – १९८३।
14. श्रीचैतन्यचरितामृतम् (संस्कृतपद्यानुवादः) – भास्करानन्दसरस्वती, श्रीक्षेत्रनाथः, कोलकाता।


## पादटिप्पणी

[i] चैतन्यचन्द्रामृतम्

[ii] श्रीगौरकृष्णोदयः, प्रथमसर्गः -६२

[iii] श्रीगौरकृष्णोदयमहाकाव्यस्य भूमिकायाम्

[iv] श्रीगौरकृष्णोदयः, नवमसर्गः – ५६

[v] श्रीगौरकृष्णोदयः, प्रथमसर्गः - ४

[vi] श्रीगौरकृष्णोदयः, नवमसर्गः - ३६

[vii] श्रीगौरकृष्णोदयः,द्वितीयसर्गः - १

[viii] श्रीगौरकृष्णोदयः, प्रथमसर्गः - ४२

[ix] श्रीगौरकृष्णोदयः,द्वितीयसर्गः - ३७

[x] श्रीगौरकृष्णोदयः,तृतीयसर्गः ६४

[xi] श्रीगौरकृष्णोदयः, द्वितीयसर्गः ४३

[xii] श्रीगौरकृष्णोदयः,तत्रैव - ६२

[xiii] श्रीगौरकृष्णोदयः,प्रथमसर्गः - ३६

[xiv] श्रीगौरकृष्णोदयः,तृतीयसर्गः - ३४

[xv] श्रीगौरकृष्णोदयः,द्वितीयसर्गः – ३०

[xvi] श्रीगौरकृष्णोदयः,तत्रैव - ४९

[xvii] श्रीगौरकृष्णोदयः,तत्रैव - ५०

[xviii] श्रीगौरकृष्णोदयः,प्रथमसर्गः - २३

[xix] श्रीगौरकृष्णोदयः,तत्रैव - ४४

[xx] श्रीगौरकृष्णोदयः,तत्रैव – १९